श्रीजानकीवल्लभाय नमो नमः

श्रीहनूमते नमः

श्रीमते रामानन्दाचार्याय नमः

श्रीमद्गोस्वामि तुलसीदासाय नमः

# सदाशिव संहिता

# (रामानुज वेद संवाद)

श्रीरामावतार हिन्दुधर्मोद्धारक यतिराजेश्वर आचार्यचक्रचूड़ामणि
श्रीसम्प्रदायप्रवर्तक आद्यजगद्गुरु श्रीस्वामीरामानन्दाचार्य चरणाश्रित
कपिलावतार श्रीमद्योगानन्दाचार्यवंशोद्भव अखिलजगदोद्धारक
अनन्तश्रीसमलंकृत स्वामी प० श्रीरामवल्लभाशरण शिष्यशिष्यस्य
निखिलनिगमागमपुराणेतिहासशास्त्रपारावारपारीण
धर्मचक्रवर्ती प्रस्थानत्रयीराघवकृपाभाष्यकार
जगद्गुरुरामानन्दाचार्य पदसमलंकृत
श्रीस्वामीरामभद्राचार्य
कृपाकटाक्षाश्रित
सीतारामदासेन
संकलितः

भगवन्योगिनां श्रेष्ठ सर्वसत्वनिकेतन।
भूधारकारणावास देवदेवजनार्दन॥ १॥

सर्वेषां त्वं परं ज्योतिः परमात्मा प्रकृतेः परः।
गुणेश्वरो गुणमयो गुणातीतो महेश्वरः॥ २॥

रघुवंशयशश्चन्द्र वर्द्धनो विश्वभावनः।
सुमित्रा हृदयानन्दश्चन्द्रको विश्वपालकः॥ ३॥

विषेभ्यं परं वस्तु त्वमात्मा सर्वदृक् पुमान्।
दाशरथे महाराज राक्षसानां कुलान्तक॥ ४॥

रामानुज महाबाहो देव देव रमापते।
सहस्रमूर्द्ध्नि विश्वात्मन् कार्यकारण तत्ववित्॥ ५॥

अस्माकं विषयान्धानां श्रुतीनां भ्रान्त चेतसाम्।
परमात्मनि रघुश्रेष्ठे श्रीरामे परमाद्भुते॥ ६॥

भ्रान्तिरासीन्महादेव तच्छान्तिं कर्त्तुमर्हसि।
प्राकृते प्रलये प्राप्ते व्यक्तं व्यक्ते गते पुरा॥ ७॥

उदरीकृत्य संरोधाद् ऊर्णनाभिरिवात्मजान्।
कीदृशी क्रियते सृष्टिः पाल्यते केन वा पुनः॥ ८॥

कीदृशं चामरस्थानं यत्र तिष्ठति राघवः।
प्रकृत्याव स स संरोधः बोधश्च केन जायते॥ ९॥

कुत्र क्रीडति विश्वात्मा जानकी प्रेम लम्पटः।
श्रीरामस्य परंधाम सीतास्पद मनोहरम्॥ १०॥

निर्गुणं निरहंकारं निर्विकारं निरञ्जनं।
निरामयं निराभासं निरवेद्यं निर्लेपकम्॥ ११॥

सदसद्भ्यः परंवस्तु यज्योतिरमलं शिवम्।
गुह्यात् गुह्यतमं दिव्यं यत्र कुत्र विराजितम्॥ १२॥

निर्गुणं ब्रह्म तत्सर्वं नित्य स्वच्छ गुणान्वितम्।
नारायणादिरूपाणि ज्ञात्वा चास्माभिरच्युते॥ १३॥

स्वगुणं ब्रह्म तत्सर्वं वस्तु बुद्धिर्न ते पुनः।
ब्रह्मेति यद्यते याभिर्यद्रूपं परमाद्भुतम्॥ १४॥

तद्रूपं कथयास्माकं त्वं देवः सर्वदेश्वरः।
किं रूपं किमधिष्ठानं किं तेजः परमाद्भुत॥ १५॥

यत् श्रुत्वा न निवर्तन्ते संसारार्णव वर्त्मनि।
श्रुत्वैतत्परमप्रीतः सुमित्रानन्दवर्द्धनः॥ १६॥

श्वासान् मुञ्चन् पुनः प्राह श्रुतिश्चैताः पुराकिल।
अस्माकं स्वामिनो भ्रातुः पादपद्म दिदृक्षया॥ १७॥

युष्माभिः पृच्छते सर्वं भाग्यं तन्निगमात्मम्।
कल्पकोटि सहस्राणि कल्प कोटि शतानि च॥ १८॥

पञ्चाङ्गोपासनेनैव रामे भक्तिः प्रजायते।
अहोभाग्यमहोभाग्यमीदृशं वो मनो गतम्॥ १९॥

अवश्यमेववक्तव्यं युष्माकं हि तमुत्तमम्।
नमस्कृत्य जगन्नाथं देवदेवं रघूद्वहम्॥ २०॥

द्विभुजं श्यामलं शान्तं केवलं भव खण्डनम्।
यत् श्रुत्वा प्राणिनः सर्वे न पुनर्योनिमाविशत्॥ २१॥

गुह्यात्गुह्यतमं दिव्यं गुह्यानां गुह्यमुत्तमम्।
तत्सर्वं सम्प्रवक्ष्यामि श्रुत्वा मनसि संश्रृणु॥ २२॥

शठायपरिशिष्यायदात्वामृत्युमवाप्नुयात्।
इदं सत्यमिदं सत्यं सत्यमेतन्नसंशयः॥ २३॥

अन्यथा प्रभवं कृत्वा तिर्यग्योनिमवाप्नुयात्।
महर्लोकं क्षितेरुर्ध्वमेककोटिप्रमाणतः॥ २४॥

कोटिद्वयेन विख्यातं जनलोकं व्यवस्थितम्।
चतुष्कोटिप्रमाणन्तु तपोलोकं विराजितम्॥ २५॥

उपरिष्टात्ततः सत्यमष्टकोटिप्रमाणतः।
आपः प्रव्याप्तकौमारः कोटिषोडशसंभवः॥ २६॥

तदूर्ध्वे परिसंख्यातमुमालोकं सुनिश्चितम्।
शिवलोकं तदूर्ध्वे तु प्रकृत्या च समागतम्॥ २७॥

विश्वस्य पुरतो वृत्तिः शिवस्य पुरतो वहिः।
एतस्माद्बहिरावृत्तिः सप्तावरणसंज्ञकम्॥ २८॥

तदूर्ध्वे सर्वसत्त्वानां कार्यकारणमानिनाम्।
निलयं परमं दिव्यं महावैष्णवसंज्ञकम्॥ २९॥

शुद्धस्फटिकसंकाशं नित्यस्वच्छमहोदयम्।
निरामयं निराधारं निराम्बुधिसमाकुलम्॥ ३०॥

भासमानं स्ववपुषा वयसा संविजृम्भितम्।
मणिस्तंभसहस्रैस्तु निर्मलं भुवनोत्तमम्॥ ३१॥

वज्रवैदूर्यमाणिक्यैर्ग्रथितं रत्नदीपकम्।
हेमप्रासादमावृत्य तरवः कामजातयः॥ ३२॥

रत्नकुण्डैरसंख्यातैः पुरुषैर्मलयवासिभिः।
स्त्रीरत्नैः परमाह्लादैः संगीतध्वनिमोदितैः॥ ३३॥

स्तुतं च सेवितं रम्यं रत्नतोरणमण्डितम्।
कारुण्यरूपं तन्नीरं गंगा यस्माद्विनिःसृताः॥ ३४॥

अनन्तयोजनोच्छ्रायमनन्तयोजनायुतम्।
यत्र शेते महाविष्णुर्भगवाञ्जगदीश्वरः॥ ३५॥

सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्।
यन्निमेषाज्जगत्सर्वं लयीभूतं व्यवस्थितम्॥ ३६॥

इन्द्रकोटिसहस्राणां ब्रह्मण्डानां सहस्रशः।
उद्भवन्ति विनश्यन्ति कालज्ञानविडंबनैः॥ ३७॥

यदंशेन समुद्भूता ब्रह्मविष्णुमहेश्वराः।
कार्यकारणसंपन्ना गुणत्रयविभावकाः॥ ३८॥

यत्त आवर्तते विश्वं यत्रैव च प्रलीयते।
तद्वेदाः परमं धाम मदीयं पूर्वसूचितम्॥ ३९॥

एतद्गुह्यं समाख्यातं ददातु वाञ्छितं हि नः।
तदूर्ध्वं तु परं दिव्यं सत्यमन्यद्व्यवस्थितम्॥ ४०॥

न्यासिनां योगिनां स्थानं भगवद्भावनात्मनाम्।
महाशंभुर्मोदतेऽत्र सर्वशक्तिसमन्वितः॥ ४१॥

तदूर्ध्वं तु परं शान्तं महावैकुंठसंज्ञकम्।
वासुदेवादयस्तत्र विहरन्ति स्वमायया॥ ४२॥

तदूर्ध्वं तु स्वयं शान्तं गोलोकं प्रकृतेः परं।
वाङ्मनो गोचरातीतं ज्योतिरूपं सनातनम्॥ ४३॥

नित्यं गुण महोत्साहं नित्योत्सव गुणान्वितम्।
सौभाग्यनिलयं कान्तमानन्दकर मन्दिरम्॥ ४४॥

नित्यानन्दमयंरम्यं गुणोत्पत्ति महोदयम्।
सर्वर्तुरासंयुक्तं प्रमदागण सेवितम्॥ ४५॥

पुण्यद्वीप समाजुष्टं जुष्टं च परमर्षिभिः।
सरितां जलकल्लोलं विलोलं नलिनी कुलम्॥ ४६॥

तुलसीपुष्पसौभाग्यं नित्यान्त वन मोदितम्।
वासन्तीचम्पकाशोकपारिजातमहोदितम्॥ ४७॥

मालतीयूथिकाम्भोजकुन्दमन्दारसेवितम्।
केतकीमल्लिकोल्हाशं कदम्बघनमण्डितम्॥ ४८॥

दिव्य रत्नसमाकीर्णं हरिवंश सुरक्षकम्।
इदं वेदापरं रम्यं संदद्याद्वाञ्छितंहिनः॥ ४९॥

यत्रास्ते च स्वयं पुण्या सरयूर्विरजाम्बुजा।
सुरभिः सुरगणा यत्र वृन्दादेवी मनोहरा॥ ५०॥

यत्र संतानकं नाम वनं दिव्यं हरेः प्रियम्।
तत्रैव देव्यावृन्दायावनं कामदुघैर्द्रुमैः॥ ५१॥

तयोर्मध्ये पुरं दिव्यं साकेतं नाम संज्ञितम्।
योषिद्रत्नमणिस्तम्भं प्रासाद गुणसेवितम्॥ ५२॥

दिव्यचामरसंयुक्तं मुक्तादामविलंविनम्।
चन्द्रातपघनच्छायां हेमकुम्भपरिस्कृतम्॥ ५३॥

पताकातोरणैरम्यं सुधासार घनाचलम्।
व्यंकटाद्रि चित्रकूट गोवर्द्धन गिरि त्रयम्॥ ५४॥

चामरग्राहिणी पुण्या प्रमदायुतनायकम्।
परिषादुर्ग संकीर्णं मणिवज्रकपाटकम्॥ ५५॥

दशकक्षासमापन्नं प्रभिन्न कपिरक्षकम् ।
चतुर्द्वार परासक्तं वह्नि विन्दु सुरश्मिकम् ॥ ५६ ॥

पूर्वप्राची दक्षोत्तर द्वारोपेताः सुरक्षकाः ।
आत्मतुल्यबलोपेताः सर्वैश्वर्यगुणान्विताः ॥ ५७ ॥

महाबलामहोत्साहा रामध्यानपरायणाः ।
रामाङ्घ्रि भक्ति निरताः निवृत्ताशेषवृत्तयः ॥ ५८ ॥

दिव्याम्बरधराः सौम्या दिव्याभरणभूषिताः ।
दिव्यगन्धानुलिप्ताङ्गाः दिव्यमाल्यविभूषिताः ॥ ५९ ॥

यज्ञसूत्रगुणोपेताः लसन्मौलिकिरीटिनः ।
सिंहासनेसमासीनाः ललना युतसेविताः ॥ ६० ॥

गदेषुचापशैलाग्रतरुहस्ताः व्यवस्थिताः ।
सुग्रीवाङ्गदवीरौ च विभीषणनिलात्मजौ ॥ ६१ ॥

पश्चिमांपातिधर्मात्मा राक्षसेन्द्रो हरिप्रियः ।
पूर्वमावृत्य विश्वात्मा सुग्रीवस्तेजसात्मकः ॥ ६२ ॥

उत्तरं रक्षति वीरो वालिपुत्रो ममप्रियः ।
दक्षिणं तु सदा पाति हनुमान्नाम वत्सलः ॥ ६३ ॥

सर्वसत्वगुणोपेतः सर्वसत्वनिकेतनः ।
महाशम्भुः स्वयं सोऽपि कपिरूपो दुरासदः ॥ ६४ ॥

सीतादत्तमहाहार शोभितोरु महाभुजः ।
श्रीराम पार्षदैर्नित्यैर्हरिराक्षसयूथपैः ॥ ६५ ॥

रक्षितं पुरतः सम्यक् शालतालशिलायुधैः ।
बलश्चप्रबलश्चैव नन्दकश्चोपिनन्दकः ॥ ६६ ॥

चण्डोवीरः प्रचण्डश्च नन्दकश्चसुनन्दकः।
भद्रश्चापिसुभद्रश्च द्वारोपेताः सुरेश्वराः॥ ६७॥

चतुर्भुजाः सायुधाश्च सर्वाभरणभूषिताः।
एतैरपिवृतं मध्ये देवानां कपियूथपैः॥ ६८॥

नलकुमुदनीलाद्यास्तुल्यवेषाः किशोरकाः।
निर्विकाराः महोदाराः धीरोदात्त गुणोत्तराः॥ ६९॥

गदां हस्ताः कामरूपाः रामावयवसम्भवाः।
महासत्वास्तुल्यरूपाः रामभक्तारहस्कराः॥ ७०॥

अन्तरङ्गाः प्रियतमाः अङ्गावरणपालकाः।
गायन्तिसुस्वरंप्रीत्या नृत्यन्ति मधुरस्वराः॥ ७१॥

जयश्चविजयश्चैव वरायुधधरावुभौ।
देवानां प्रवरौ नित्यौ सप्तमेपि सुनिष्ठितौ॥ ७२॥

भवनस्योत्तरे वेदाः दिग्विभागे समेखले।
सर्वतः काञ्चिनी भूमिर्दिव्योद्यानं समुद्यमे॥ ७३॥

वर्हालि कोकिल सृष्ट नादिते शुक कूजिते।
वृन्दागुल्मघनच्छाये कुञ्जपुञ्जमधुश्रवे॥ ७४॥

चिन्तामणि महापीठे सर्वसत्वनिकेतनम्।
तन्मध्ये परमोदारं कल्पवृक्षो वरप्रदः॥ ७५॥

वज्राङ्गयष्टिकः श्रीमान् करुणां कुरु मूलकः।
षद्वेमरसश्रावी वाञ्छित त्वचि समावृता॥ ७६॥

दानस्वभावः सततं स्थितिर्मौनं गतिर्जयः।
इन्द्रनीलमणिप्रख्य नित्यस्वच्छसुपुत्रकः॥ ७७॥

धर्मार्थकामपुष्पालि स्कन्दशाखसमुत्थितः।
प्रवालमञ्जरीरम्यमानन्द पुष्पसञ्चयः॥ ७८॥

चिन्तामणि फलोत्पत्तिः करोतु वाञ्छितं हि नः।
तस्याधः परमं दिव्यं रत्नमण्डप भूषितम्॥ ७९॥

तन्मध्ये वेदिकारम्या स्वर्णरत्नविभूषिता।
तन्मध्ये च परं शुभ्रं रत्न सिंहासनं शुभम्॥ ८०॥

सहस्रारं महापद्मं कर्णिकारमनुत्तमम्।
तन्मध्येमुद्रिकाभिन्नं मुद्राद्वापि विभिन्नकं॥ ८१॥

वह्नीन्दु मण्डलेनापि वेष्टिते विन्दुभूषितम्।
चन्द्रकोटिप्रतीकाशं छत्रकं च स चामरम्॥ ८२॥

सदामृतघनश्रावी मुक्तादामवितानकम्।
तन्मध्ये जानकी देवी सर्वशक्ति समन्विता॥ ८३॥

यत्रास्ते भगवान् रामः सर्वदेव शिरोमणिः।
तत्रादौ चिन्तयेत्तेजौ वह्नि रूपं सशक्तिकम्॥ ८४॥

तेजसामहता श्लिष्टमानन्दैकाग्रमन्दिरम्।
एकाग्रमनसापश्ये तत्रदेवंसुविग्रहम्॥ ८५॥

स्निग्धमिन्दीवरश्यामं कोटीन्दुललितद्युतिम्।
चिद्रूपं परमोदारं वीरभद्रं रघूद्वहम्॥ ८६॥

द्विभुजं मधुरं शान्तं जानकी प्रेम विह्वलम्।
दोर्दण्डचण्डकोदण्ड शरचण्डमहाभुजम्॥ ८७॥

सीतालिङ्गित वामाङ्गं कामरूपं रसोत्सुकम्।
करुणांकुरु संकाशं विकचाम्बुजपादकम्॥ ८८॥

पदद्वन्द्वनखश्चन्द्रं व्रियते तेजसावृतम्।
कूर्मपृष्ठसदाभासं रणन्मञ्जीरपादकम्॥ ८९॥

कटि सूत्रांकितं श्रीशं यज्ञसूत्रैरलङ्कृतम्।
रत्नकंकणकेयूर शोभिताग्रभूजद्वयम्॥ ९०॥

चन्द्रकोटिप्रतीभासं कौस्तुभेनविराजितम्।
दिव्यरत्नसमायुक्तं मुद्रिकाभिरलङ्कृतम्॥ ९१॥

नाशांशैकसमायुक्तं मुक्ताफलस्फुरन्मुखम्।
सूर्यकोटिप्रतीकाशं कुण्डलाद्यश्रुतिद्वयम्॥ ९२॥

प्रद्युतारुणसंकाशं किरीटेन विराजितम्।
गोविन्दगोविदां श्रेष्ठं चिन्मयानन्दविग्रहम्॥ ९३॥

दिव्यायुध सुसम्पन्नं दिव्याभरणभूषितम्।
अक्षरं केवलं ब्रह्म पीतकौशेयवाससम्॥ ९४॥

शङ्खचक्रगदापद्म चर्मासिहलमूसलैः।
तद्रूपैर्विविधाकारैः सेव्यमानं परात्परम्॥ ९५॥

भानुकोटि प्रतीकाशं चन्द्रकोटिप्रमोदकम्।
इन्द्रकोटिसदामोदं वसुकोटिवसुप्रदम्॥ ९६॥

विष्णुकोटिप्रतीकाशं ब्रह्मकोटिविसर्जनम्।
रुद्रकोटिप्रमथनं वै मातृकोटि विनाशनम्॥ ९७॥

भैरवः कोटि संहारं मृत्युकोटि विवत्सकम्।
यमकोटिदुराधर्षं कालकोटिप्रधावकम्॥ ९८॥

गन्धर्वकोटिसङ्गीतं गणकोटिगणेश्वरम्।
कामकोटिकलानाथं दुर्गाकोटिविमोहनम्॥ ९९॥

सर्वसौभग्य निलयं सर्वानन्दैकदायकम्।
कौशल्यानन्दनं रामं केवलं भवखण्डनम्॥ १०० ॥

विश्वावसुचित्रकेतुचित्रसेनाद्युलूककौ।
तुंबरैर्नारदाद्यैश्च शुकपीकसुकण्ठकैः ॥ १०१ ॥

गीयमानं परंतत्त्वं श्रुतिजातिविशारदैः।
अनन्तांशसमुद्भूतं मुनिनाक्षर रूपिणा ॥ १०२ ॥

संगीयमानं विनयाद्वाल्मीकिनान्तरात्मना।
मत्स्यकूर्मवराहाश्च नृसिंहहरिवामनैः ॥ १०३ ॥

भार्गवहलिकंसारि बुधकल्किविमिश्रितैः।
उपास्यमानं देवेशं देवानां प्रवरं विभुम्॥ १०४ ॥

तत्र वागीश्वरी देवी माधवी प्रियवल्लभा।
असिता च सिता चैव प्रकृतिर्गुण सम्भवा ॥ १०५ ॥

उमादेविमहामाया श्रुतिजातिविशारदा।
पद्महस्ता विशालाक्षी कमला हरिवल्लभा ॥ १०६ ॥

सुरभीप्रेमसानित्या वृन्दादेवीमनोरमा।
चिदात्मकं सदाभासं नयनानन्ददायकम्॥ १०७ ॥

सुकान्तं हृदयारामं रामंराजीवलोचनम्।
निर्विकाराः पृथुश्रोण्योराघवं पर्युपासते ॥ १०८ ॥

उर्वशीमेनकारम्भाराधा चन्द्रावलीस्तथा।
हेमा क्षमा वरारोहा पद्मगन्धा सुलोचना ॥ १०९ ॥

हंसिनी मालिनी पद्मा हरिणी मृगलोचना।
कर्पूराङ्गी विशालाक्षी शक्तिप्रियारसोत्सवा ॥ ११० ॥

चारुनेत्रा चारुगात्रा सर्वाङ्गी चारुलोचना।
रामाग्रे परिनृत्यन्ते गीत वादित्र मोहिताः॥ १११॥

गोपकन्यासहस्रैस्तु गोपबालैश्चताद्दशैः।
गोकुलैरावृतं सम्यक् पद्मसंख्यादिभिस्तथा॥ ११२॥

अथावरणम्

अङ्गादिपरिसंकीर्णमात्मादि शक्तिरञ्जितम्।
वेष्टितं वासुदेवाद्यैः सेवितं हनुमदादिभिः॥ ११३॥

नयानयकलावेश नीलादिबलमोदकम्।
अंशादंश समुत्पत्तिर्ध्रुवादि परि वृंहितम्॥ ११४॥

इन्द्रादिदेशदिक्पालैर्वेष्टितं नतकन्धरैः।
वज्राद्यामायुधैर्दिव्यैः पूजितंकरपालितैः॥ ११५॥

तासां मध्ये वरारोहा तप्त काञ्चन सन्निभा।
विद्युच्चैलांचलेनापि वीजयन्ति पतिं मुदा॥ ११६॥

वामाङ्गाश्लिष्टदिव्याङ्गी यज्ञश्रेयविधायिनी।
प्रेमानन्दसुखोत्पत्तिश्चिद्रूपा परमाकुला॥ ११७॥

ज्ञाप्ति मात्रात्मिकानन्दा सर्वैश्वर्यरसोत्सवा।
अर्द्धमात्रात्मिका नित्या चोंकाराक्षरसम्भवा॥ ११८॥

सर्वशक्तिमयीरम्या शक्तीनांशक्तिदायिनी।
जननी सर्वभूतानां योगिनामपि मोहिनी॥ ११९॥

स्वयमात्मद्विधाभूत्वा परमानन्दरूपिणी।
परमानन्दसन्दोहा ज्ञानानन्दसुविग्रहा॥ १२०॥

सा सीता भगवती ज्ञेया राघवांश विनिःसृता।
तयादेव्या परंवेदाः काले काले प्रसूयते॥ १२१॥

ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो ऋषयस्तथा।
भवकालेनृणां सैव राजसीशक्तिरूपिका॥ १२२॥

जगती पालने शक्तिर्लक्ष्मी रूपा भवत्युत।
संहारे समनुप्राप्ते तामसीशक्तिरुत्तमा॥ १२३॥

विश्वगर्भाविगर्भा वै मूलप्रकृतिसंज्ञका।
यस्याः कटाक्ष मात्रेण ब्रह्माण्डानां सहस्रशः॥ १२४॥

अविर्भावस्तिरोधानं किं पुनः सृष्टिरेकधा।
ऊत्यर्थे राघवस्याथ परमस्य च विभूम्नः॥ १२५॥

प्रतिलोम्नि च ब्रह्माण्डं श्रावयन्ति मुहुर्मुहुः।
सा तु देवी परा नीत्या सोऽथ रामः परोहरिः॥ १२६॥

तयोरैकं विजानीयात् कार्यकारण कारणात्।
तयोर्भावसमापन्नः कुमारः समपद्यतः॥ १२७॥

श्रृङ्गाराख्यः सुकुमारः सर्वलोकैक मोहनः।
येन विजृम्भितं विश्वं येन सर्वमिदं ततम्॥ १२८॥

येन वशीकृताभावा यस्मिन् सर्वं प्रलीयते।
गोविन्द इति विख्यातो रामः सत्ता विजृम्भितः॥ १२९॥

साकेत पश्चिमे द्वारात् वृन्दावनमदूरतः।
गोगणैरावृतः श्रीमान् क्वणद्वेणु विनोदकृत्॥ १३०॥

सर्वरासरसोत्पन्नो गोपकन्यासमावृतः।
गोवर्द्धनगिरिस्तत्र यत्रदेव प्रतिष्ठितः॥ १३१॥

एतत् गुह्यं परं वेदाः युष्माकं तदकाम्यया।
कथितं सानुपूर्वेण राघवस्य परं महः॥ १३२॥

एतत् श्रुत्वा परंधाम मनसा राघवे स्थितम्।
उद्धरेत्सप्तगोत्राणामेकोत्तरशतंकुलम्॥ १३३॥

यत्रकुत्रमृतोवापि तिष्ठन्नश्नन्स्वपन्नपि।
गोलोकेनियतंवासः सत्यं सत्यं वदाम्यहम्॥ १३४॥

देवैरपि दुराधर्षं किमुतान्य गणैरपि।
अश्वमेध सहस्राणि वाजपेय शतानि च॥ १३५॥

अटनं सर्वतीर्थेषु प्रदानं सर्वसम्पदाम्।
एतत् तद्ध्यान योगस्य कलां नार्हति षोडशी॥ १३६॥

ब्रह्महत्या सहस्राणिज्ञानज्ञान कृतानि च।
स्वर्णस्तेपि सुरापानी गुरुतल्पायुतानि च॥ १३७॥

कोटि कोटि सहस्राणि स्वपापानि च यान्यपि।
सर्वाण्यपि प्रणश्यन्ति रामधाम विसूचनात्॥ १३८॥

। इति श्रीसदाशिवसंहितायां निरुक्तलक्ष्मणायां रामानुजवेदसंवादे गोलोकवर्णनं नाम प्रथमोध्यायः।

श्रुतिरुवाच

श्रुतस्माभिरीशान रहस्यं परमाद्भुतम्।
इदं विश्वं कथं जातं सौमित्रे वद तत्त्वतः ॥ १ ॥

श्रृणुध्वं श्रुतयः सर्वा रहस्यं सृष्टि सम्भवम्।
यथाद्युपरिसम्भूतं तस्मिन्नेव प्रलीयते ॥ २ ॥

सृष्टिरग्रे परं धाम्नि संवादः किमभूत्किलः।
महाशम्भुर्महाविष्णुर्महामायेरितः पुरः ॥ ३ ॥

महाशम्भुर्महामायामहविष्णुश्च (सक्रियः/शक्तियः)।
काले तु समनुप्राप्ते राघवं परिचिन्तयन् ॥ ४ ॥

महाविष्णुरुवाच

(कस्मादाविरहं) तात केनवाजनिरुत्तमा।
किं मूलं किमधिष्ठानं कुत एव समागतः ॥ ५ ॥

कथं मूलं विजानामि तव देव प्रसादतः।
एतत् ते श्रोतुमिच्छामि प्रसादं कुरु मे प्रभो ॥ ६ ॥

महाशम्भुरुवाच

अखण्ड ब्रह्मणो नित्यात् राघवात् नित्य विग्रहात्।
चिदात्मकात् परानन्दात् साकेतनगराधिपात् ॥ ७ ॥

मिथुनं पुरा प्रजातं सीतायाङ्ग विमोक्षणात्।
एकं वस्तु यथाधारे नानात्वेनोपलक्षते ॥ ८ ॥

तथैकं परमं ब्रह्म नित्य लीला सुविग्रहम्।
अद्वैतं सर्व तन्त्रेषु (स्त्रीपुरुषव्यवस्थितिः) ॥ ९ ॥

महाविष्णुरुवाच

कथमेतद्विजनामि मिथुनं ब्रह्मसम्भवम्।
सीता कापि परा नित्या रामको वा सदात्मदृक्॥ १०॥

त्वं देवः परमं ज्योतिर्मातेयं परमागतिः।
युवाभ्यां परतो नित्यौ कौ तौ देवौ सुरेश्वरौ॥ ११॥

संशयो मे (महान्तात) हृदये परिवर्त्तते।
अनुग्राह्यास्त्वया शम्भो पुत्रोहं यदि तस्तव॥ १२॥

महाशम्भुरुवाच

श्रृणु तात प्रवक्ष्यामि रामस्याद्भुतकर्मणः।
सीतायाश्चपरंदेव्या लीलामात्राखिलं जगत्॥ १३॥

अति उग्रे सतो धाम्नि सतो वाक् वह्नि रूपिका।
कालानिलसमारूढा वर्गपञ्चान्त भूषिता॥ १४॥

इन्द्रनीलमणिस्निग्धरुचिराकृतिरव्ययः।
द्विभुजावयवोद्दक्तः शरकोदण्डमण्डितः॥ १५॥

इति रामो विग्रहवान् परं ब्रह्माभिधीयते।
भुक्ति मुक्ति प्रदानार्थं साधाकानां पुनः पुनः॥ १६॥

आनन्दवाचकः शब्दः विभूतिः संप्रयोजितः।
अन्ते विष्णुं विजानीयात् प्रकृतेर्वशमागतम्॥ १७॥

एवं ज्ञेया परं नित्या सीता ब्रह्मसुविग्रहा।
अनुग्रहार्थमस्माकमेकंब्रह्मद्विधाकृतम्॥ १८॥

आनन्दावयवोभिन्ना नित्यलीलासुविग्रहा।
सर्वशक्तिमयीधात्री सर्वशक्तिमयी तथा॥ १९॥

प्रेमानित्यसुखोत्पत्तिर्नित्यरूपाचिदात्मिका।
ज्ञानमयीज्ञानभूताज्ञानदाज्ञप्तिमात्रिका॥ २०॥

अर्द्धमात्रात्मिकाशश्वत्विन्दुनादस्वरूपिणी।
ब्रह्मोत्पत्ति रसावेशा ब्रह्मैकपदमव्ययम्॥ २१॥

निष्कलापिकलाधीशनिर्गुणापिगुणात्मिका।
नित्योत्सवापरास्निग्धारामावयवसम्भवा॥ २२॥

लीलार्थं हि विभोर्नित्यं राघवस्यविहारिणः।
अविर्भावन्तिरोभावं करोति गुण संगतः॥ २३॥

विश्वोत्पत्तिर्गुणाभासा जगदानन्दकारिणी।
श्रीरामसन्निधिवशात् करोतिविकरोतिच॥ २४॥

इन्द्रकोटिसहस्राणि ब्रह्माण्डानांशतानिवै।
लीलामात्रंजगद्धात्रीसीतायास्त्वंनिबोधमे॥ २५॥

अहं तथा महादेव्या संप्रसूतोनयासह।
आद्यासृष्टिरितिख्यातंजनकौतवसुव्रत॥ २६॥

आवाभ्यां त्वं महाबाहो सर्वदेवेश्वरेश्वरः।
आविर्भूतोगुणावासः सर्वकारणकारणम्॥ २७॥

एषा देवी महामाया सीतादेह समुद्भवा।
प्रकृतिर्गुणसम्पन्ना योनिरूपाप्रकीर्तिता॥ २८॥

एषोहं परमं ज्योतिस्तल्लिङ्गं भगवान् शिवः।
आद्यो जातो महाबाहो कालेन सह मायया॥ २९॥

योनिलिङ्गात्मकं विश्वं रामवीर्ये प्रतिष्ठितम्।
रामबीजसमुद्भूतं वह्निव्योमात्मकं जगत्॥ ३० ॥

यथाङ्गसूक्ष्म वीर्यस्य प्राकृतस्त्वं महाद्रुमः।
तदैवरामवीर्यस्थं जगदेतच्चराचरम्॥ ३१ ॥

योनिरूपामहामाया तल्लिङ्गो भगवान्ह्यहम्।
उभयोरपितुल्यार्थेदर्शितश्चमहानघ॥ ३२ ॥

सीतारूपामहामायारामरूपोह्यहं विभो।
आज्ञयातस्यदेवस्यकरोमिविकरोमिच॥ ३३ ॥

मिथुनं यत्त्वयापृष्ठमधिष्ठानं समूलकम्।
एतत् सर्वं मयाख्यातं गुह्यात्गुह्यतमंमहत्॥ ३४ ॥

महाविष्णुरुवाच

धन्यस्त्वं कृतकृत्यस्त्वं जितात्मासि महेश्वरम्।
वाङ्मनो गोचरातीतो यत्ब्रह्म प्रकटी कृतम्॥ ३५ ॥

इदानीं लब्ध संज्ञोस्मि मूलतत्त्वविशोधनात्।
ज्ञानैश्वर्यबलोत्साहैरामशक्त्योपबृंहितम्॥ ३६ ॥

कृपाकृतात्वयातात रामधामनिरूपितम्।
सीतायाश्चतथादेव्याः कीर्तयेतत्सुनिश्चितम्॥ ३७ ॥

पृच्छामि त्वां महादेव कथ्यतां यदि रोचते।
संशयोमे महानासीत् तच्छान्तिं कर्तुमर्हसि॥ ३८ ॥

कस्मिन्धाम्नि च विश्वात्मा सीतया सह राघवः।
दिविक्रीडारतोदेवःसर्वशक्तिविनोदकृत्॥ ३९ ॥

के देवाः मुनयस्तत्र के सन्ति पार्श्ववर्तिनः।
द्वारपालाश्च पीठाश्च किं रूपेण व्यवस्थिता॥ ४०॥

कादेव्यः परमादिव्या याभिर्सार्द्धं नृपात्मजाः।
आत्मसात् कुर्वते प्रेम्णा रमयन्ति रघूद्वहम्॥ ४१॥

महाशम्भुरुवाच

श्रृणुत्वं देवदेवेश प्रभावं पदमव्ययम्।
रहस्यं रामदेवस्य सीतायाश्च विशेषतः॥ ४२॥

आद्यं तु वैष्णवंधाम भावगम्यं सनातनम्।
भुक्ति मुक्ति प्रदानार्थं कथयामिखिलात्मकम्॥ ४३॥

यत् श्रुत्वा न प्रवर्त्तन्ते जन्तवोविषयार्णवे।
अन्तश्चिन्त्यां वहिर्युक्तानिर्वाणगुणकर्मसु॥ ४४॥

श्रवणाद्यस्य विज्ञेयः कूटस्थो रघुनन्दनः।
निर्विकारी वनाचारी माया शत विनोदकृत्॥ ४५॥

अनिर्भिन्नगभीरत्वान्निर्गुणोगुणसंसदि।
नित्यालीलागुणारामोविरामः परमापदाम्॥ ४६॥

सर्वदृक् सर्वभोक्ता च कर्ता हर्ता रघूद्वहः।
जानकीहृदयानन्द महोल्लास विनोदकः॥ ४७॥

यत्रास्ते भगवान् देवो नित्य रूपो जनार्दनः।
तद्धाम परमं दिव्यमखण्डप्रकृतेः परः॥ ४८॥

योजनानां शतार्द्धेद्वे परेधाम्निशिवास्पदे।
महाविष्णुशिवस्थाने वैकुण्ठभुवनार्द्धगे॥ ४९॥

केवले द्वैतरहितेमायातीते गुणोज्झिते।
गोलोकेक्षरसञ्चारे प्रेमोत्सवरसोद्भवे॥ ५०॥

गुणोत्साहरसामोदेसर्वदेव नमस्कृते।
सर्वन्तुरासम्पन्नो सर्वभावसमन्विते॥ ५१॥

ऋषिसंघसुरानीकैर्नित्यरूप परिच्छदैः।
भूयानेकबलोत्साहैर्देवतुल्यपराक्रमैः॥ ५२॥

ऋक्षश्रेष्ठकपिश्रेष्ठदैत्यराक्षसपन्नगैः।
पार्षदैरस्त्रसम्पन्नैर्वीरधीरैः रणोत्कटैः॥ ५३॥

सीतासितस्वरूपांगैः (स्वरास्यै)रतिविभ्रमैः।
तद्गुणैः रूप सम्पन्नैर्दिव्याभरण भूषितैः॥ ५४॥

ललनायुतसंवादैरामाङ्घ्रि भजनोत्थितैः।
अन्योन्य भक्ति संवादैर्निरूपकरुणान्वितैः॥ ५५॥

अवतारैरसङ्ख्यातैः प्राधानैर्दशभिस्तथा।
वेदैः साङ्गोपनिषदैर्यज्ञैर्बहुविधैरप॥ ५६॥

सेव्यमाने परे रम्ये गुणावासे परं पदे।
सर्वदागुणसंवादे षड्वर्गरिपुवर्जिते॥ ५७॥

आनन्दस्वरूपेनित्येपरेपारेगुणान्विते।
सरयूजलकल्लोलविमन्दित्वतमन्मथे॥ ५८॥

तस्याश्चान्तः पुरे दिव्ये साकेतभुवनोत्तमे।
जानकीपदसञ्चारेविहाररतिविभ्रमे॥ ५९॥

तुलसीकुन्दमन्दारचम्पकाशोकमल्लिके।
वापीकूपतड़ागादि प्रफुल्लकमलोत्तमे॥ ६०॥

अखण्डब्रह्मसन्दोहेस्वरूपानन्दविग्रहे।
सीताङ्गपरिसम्भूतानेकशक्तिमनोहरे॥ ६१॥

सीताङ्घ्रिकमलस्पर्शजाताम्बुज सहस्रके।
सुरद्रुमलतागुल्मछायारम्यप्रमोदके॥ ६२॥

संतानकमहारण्यं वृन्दारण्यं सुमण्डिते।
स्वप्रकाशरसग्रामसुख वृत्त/व्रत महोत्सवे॥ ६३॥

कल्पवृक्षतरुच्छायेसर्वाधारसमन्विते।
चिन्तामणिमहापीठे रत्नमण्डपमध्यगे॥ ६४॥

तन्मध्ये वेदिका रम्या तत्र दिव्यावरासनं।
तत्र सिंहासने दिव्ये हेमाम्बुजदलाष्टके॥ ६५॥

तद्गते कर्णिकामध्ये मुद्रात्रयविभिन्नके।
तत्र देवं समासीनं सीतया सह राघवम्॥ ६६॥

अखण्डब्रह्मनिर्वाण द्विभुजः खरसूदनः।
कोदण्डचण्डदोर्दण्डशरग्रामविभूषितः॥ ६७॥

दिव्यायुधसुसम्पन्नो दिव्याभरणभूषितः।
अदृश्यः सर्वतत्त्वानां बुद्ध्यादिनां गुणार्थिनाम्॥ ६८॥

तेजः पुञ्ज सदाभासं खण्डिता ज्ञानपालकः।
अनन्तगुणगम्भीरोधीरोदात्तगुणोत्तरः॥ ६९॥

आनन्दगुणविज्ञेयोनित्यानन्दः स्वरूपदृक्।
चैतन्य गुणमाहात्म्यः सदोदृक्त मनोरथः॥ ७०॥

आत्मदृक् गुण सम्पन्नो बुद्ध्यादिभिर्विलक्षितः।
दृश्यादृश्य गुणातीतो द्रष्टासगुणकर्मणाम्॥ ७१॥

एवं हि भगवान् वीरः पुरुषः सदसत्परः ।
दिव्यशक्तिगुणाविष्टः सीतयासहराघवः ॥ ७२ ॥

परं व्योम्नि सदाभासे दिव्यतिस्मपुनःपुनः ।
सच्चिल्लीलावपुः श्रीमान् सर्वानन्दैक मन्दिरः ॥ ७३ ॥

एकं विहरतस्तस्य श्रीरामस्याक्षरौजसः ।
अहं जातोनयासार्द्धं सीतयाविश्वकारणात् ॥ ७४ ॥

कालेनाप्यवितर्केण प्रमेबाहुलविक्रमः ।
सच्चिद्रूपीखिलव्यापी गुणभुक् गुणदृक् विभुः ॥ ७५ ॥

महोत्साहो महावीरो महावीर्यो महाबलः ।
तेजस्वभावदुर्द्धर्षे गुणानामीश्वरप्रभो ॥ ७६ ॥

सर्वाधारसमर्थोहंसर्वकारणभावनः ।
तत्त्वोत्पत्तिर्गुणावासोनिरासोगुणकर्मसु ॥ ७७ ॥

मायाविनोदसक्ताङ्गो मायोदधिरनन्तकः ।
मायारङ्गविभिन्नात्मामायोदधिविलङ्घनम् ॥ ७८ ॥

नित्यस्वस्थाप्रतीकाशं कालात्माकालकृद्विभुः ।
धीरः कलयतां कालः कालधर्मविवर्जितः ॥ ७९ ॥

कालैश्वर्यगुणारम्भो विरामइतरेषुवै ।
विश्वहेतोरधिष्ठाता विश्वभुक् विश्वदृक् शुचिः ॥ ८० ॥

इयं शक्तिस्तथा जाता जननी तव सुव्रत ।
विश्वयोनिरधिष्ठात्री विश्वधात्र्याखिलेश्वरी ॥ ८१ ॥

मोहिनीसर्वसत्त्वानां जननीसर्वसम्पदाम् ।
विश्वोत्त्पत्तिलयावास रूपत्रयविधारिणी ॥ ८२ ॥

कालरात्रिर्महारात्रिर्महामायास्वरूपिणी।
ईश्वरीसर्वभूतानां मोहिनीयोगिनामपि॥ ८३॥

भक्तानां हि स्वरूपाङ्गी विरूपाङ्गी च दुष्कृताम्।
नित्यरूपावितर्केयं हेतुवादगुणादिषु॥ ८४॥

चिरकालपरान्नीष्टा ध्यानायोगादिभिः परैः।
ध्येयाङ्घ्रि कमला नित्यायोगिवृन्दैरहर्निषम्॥ ८५॥

चिदानन्दासदानन्दाब्रह्मानन्दैकविग्रहा।
ज्ञानमयीकलावेशचिच्छक्तिर्विश्वधारिणी॥ ८६॥

मायौद्दक्तपरानन्दः रसरूपागुणात्मिका।
ज्ञानानन्दगुणाभासाचिद्रूपावर्णरूपिका॥ ८७॥

निर्विकारानिरुत्साहागुणतत्त्वविभाविनी।
निरालम्बा निराधारा कूटस्था विश्वभाविनी॥ ८८॥

ऋग्यजुःसामवेदानामुच्चारध्वनिरूपिका।
वेदार्थप्रथिताभाव्याकाव्यासाहव्यरूपिणी॥ ८९॥

योगिनां मानसाम्भोज सूक्ष्मरूपापराजिता।
योगमुद्रामहामायाकालवेगप्रहारिणी॥ ९०॥

अस्यां जातोसि देवेश मत्तः परतरो महान्।
सर्वैश्वर्य गुणाधीशः कालयान विनोदकृत्॥ ९१॥

आत्मनिष्ठापराकाष्ठानिष्ठाशान्तिप्रकाशवान्।
नानातत्वलसद्देहः प्रकृतिर्गुणवान् विभुः॥ ९२॥

भगवान् पुरुषः साक्षी आत्मानन्दैकविग्रहः।
निराश्रयोगुणाग्राम प्रकृतिर्गुणदृक् शुचिः॥ ९३॥

आत्मास्फूर्तिः सदानन्दः निरस्तप्रकृतिर्मतः।
नानातत्वविहारोसि प्रकृतिर्निलयो महान्॥ ९४॥

सदानन्दः सदाभासः सदानन्दसनातनः।
सर्वशक्तिमनोहारी सर्वशक्तिविनोदकृत्॥ ९५॥

कारणार्णवशायी च सर्वाधार वरासनः।
सहस्रमूर्द्धाविश्वात्मा सहस्राक्षः सहस्रपात्॥ ९६॥

महाविष्णुर्महातेजोः स्वप्रकाशो गुणात्मवान्।
विद्यानिधिर्महाश्रृङ्गकृपापाङ्गविमोक्षणः॥ ९७॥

कृपामयो महाबाहो महादेवो महेश्वरः।
लक्ष्मीवान् गुणसम्पन्नः सर्वैश्वर्यैक मन्दिरः॥ ९८॥

सहस्रादित्य दुर्द्धर्षः सहस्रवक्रवान् हरिः।
सहस्रायुधसम्पन्नः शार्ङ्गधन्वा गदाधरः॥ ९९॥

दुर्गमस्तु दुराराध्यो दुर्जयोदुरतिक्रमः।
निर्गुणात्मागुणातीतो गुणाधीशः स्वयं स्वराट्॥ १००॥

परं ज्योतिरतीते/तं यो विष्णुराद्ये/द्यं पुरातनः।
कृपापाङ्गविमोक्षेण कोटिब्रह्माण्डकारकः॥ १०१॥

एतत् श्रुत्वा महाविष्णुरुवाच च महेश्वरम्।
शनैः शनैः समुत्थाय दण्डवत्पतितोभुवि॥ १०२॥

नमस्ते विश्वनाथाय नमस्तेऽखिलभाविने।
नमस्तेस्तु महाशम्भो नमस्ते विश्वरूपिणे॥ १०३॥

ब्रह्मलिङ्ग स्वरूपाय मायालिङ्गं कुटंविने।
लीलामात्राखिलाधारतनवे विश्वरूपिणे॥ १०४॥

आनन्दकन्दमूलायसम्भाविन्नात्मने नमः।
व्यक्तायाव्यक्त रूपाय कार्यकारणसंसदि॥ १०५॥

प्रसीदभगवन् देव कृपां कुरु महेश्वरः।
आज्ञां लब्ध्वा करिष्यामि ब्रह्माण्डानां शतानि वै॥ १०६॥

महाशम्भुरुवाच

आत्मतुल्यबलैश्वर्ययुक्तआत्मानमात्मना।
विभज्य शतधा पुत्र कुरु कार्यं यथोचितम्॥ १०७॥

ध्येयं मूर्ते जगद्धातुरामस्याद्भुत कर्मणः।
सीताङ्घ्रि कमलं मूर्द्धि ध्यानं त्वं कर्त्तुमर्हसि॥ १०८॥

सौमित्रिरुवाच

श्रुत्वातद्वचनं घोरं महाविष्णुरचिन्तयत्।
आत्मैश्वर्य प्रकाशेन कालेन विकृतात्मना॥ १०९॥

मायाबलानुरोधेन ज्ञानेन सह तेजसा।
असृजत्सहसावेदाविश्वान् कतिपयान् वद्गन्/वदन्॥ ११०॥

सेश्वरान् गुणसम्पन्नान् देवानीकविवर्द्धतात्।
विचित्रगुणभेदेन अचिरेणरसात्मना॥ १११॥

चिरं बहु प्रयासेन कुटिं शक्तिरचेतनात्।
तांस्तथासंविलोक्यार्थ हरिर्नारायणः स्वराट्॥ ११२॥

विसृज्य त्रिविधं तेजो लीलाया विश्वकृद्विभुः।
अंशास्तेषु महाविष्णुः कृपयांस्ततः॥ ११३॥

चैतन्य घन विज्ञप्तिर्विविधान् सूर्यसंज्ञकान्।
तेषां जातास्त्रयोदेवाः ब्रह्मविष्णुमहेश्वराः॥ ११४॥

प्रकृतिबोधकः सर्वेचैतन्यघनविग्रहाः।
सर्वैश्वर्यगुणाधीशाः प्रभवो विश्वकर्मणि॥ ११५॥

रजसावर्द्धते ब्रह्मा सोमस्तस्य कलोद्भवः।
सत्वेनैव सदाविष्णुर्वह्नौ र्वह्नौ देवः प्रतिष्ठितः॥ ११६॥

तमसा च महारुद्रः सर्वसंहार कारकः।
एक एव त्रिधा भिन्नं सृष्टि स्थिति लयात्मकः॥ ११७॥

तेषु विष्णुर्महातेजाः ब्रह्मकोशेर्तुजन्तवः।
प्रतिष्ठः सहसा देवानुदतिष्ठन् जलात्ततः॥ ११८॥

चेष्टमानास्ततोलोकाः गुणकर्मविवर्द्धिताः।
इन्द्रशाः प्रथिता व्यग्राः आयन्ति प्रलयन्ति च॥ ११९॥

उन्निमेषनिमेषाभ्यां महाविष्णोरचेतना।
कालः कटाक्ष मात्रेण खण्डितास्थापितामुहुः॥ १२०॥

श्रुतिरुवाच

प्रवृत्तिश्चश्रुतादेवलोकानांवदनात्तव।
स्वभावमनुवर्त्तन्ते न निवृत्तिफलान्वितः॥ १२१॥

सौमित्रिरुवाच

सृष्ट्वाथ विविधं वेदा ब्रह्माण्डं तत्त्व वृंहितं।
सहसर्वेमहातत्वेः कृत्वा काम मनोरथम्॥ १२२॥

जगाम विमलं धाम महाशाम्भवमैश्वरम्।
तं दृष्ट्वा विमलं ज्ञानं सर्वदेवेश्वरेश्वरम्॥ १२३॥

परं ज्योतिः परं स्थानं पराकाशं परात्परम्।
पञ्चवक्त्रं महालिङ्गं मायाशक्तिमकल्मषम्॥ १२४॥

इन्दुकोटिप्रतीकाशं सूर्यानलसमेक्षणम्।
स्वज्ञानध्वस्ततिमिरं मायागुणविडम्बनम्॥ १२५॥

प्रणम्य च महादेवमुवाच परमेश्वरम्।
कृताञ्जलिपुटो भूत्वा सानन्दगद्गदाकुलः॥ १२६॥

ऋतं सर्वं महाशम्भोसेश्वरं साधिदैवतम्।
अहं तत्र प्रविष्टश्च गुणकर्मविभागवित्॥ १२७॥

इमेदेवामदंशेन चैतन्यघन विग्रहाः।
जात ईश्वरभावश्च ब्रह्मविष्णुमहेश्वराः॥ १२८॥

तेजस्त्रयं मयासृष्टं कालकर्मविभावनैः।
नियुक्तास्तेषु कुर्वन्ति भावाभाववनुत्तमौ॥ १२९॥

प्रवृत्तिश्चकृतातात लोकानां नितरामया।
निवृत्तिं कथमन्वेमि जन्मसंसारबन्धनात्॥ १३०॥

महाशम्भुरुवाच

श्रृणु वत्स प्रवक्ष्यामि लोकानां हि तमुत्तमम्।
श्रवणात् कीर्तनात् प्राज्ञः पदं याति निरामयम्॥ १३१॥

रामाङ्घ्रिकमलध्यानात् पूर्णानन्दरसाप्लुतः।
आत्मारामश्चिदानन्दो ह्यहंप्रभुरलम्पटः॥ १३२॥

इयं महेश्वरी देवी योगेशा योगमुद्रिका।
विना राम प्रसादेन क्षणमेकं न तिष्ठति॥ १३३॥

कथयिष्यन्ति ते सूत्रं रहस्यं भक्ति वर्द्धनम्।
कामाहिनष्टचित्तानां जनानां पथमुत्तमम्॥ १३४॥

महाविष्णुरुवाच

त्वं मातर्जगतांधात्रीशाम्भवीकरुणात्मिका।
महाशक्तिर्महाविद्यामहामेधासरस्वती॥ १३५॥

महामोहाच मोहाच घोररूपा विशारदा।
चिन्मयी सात्विकी विद्या राजसीतामसीपरा॥ १३६॥

कथयस्व महामाये सीतापतिरनुत्तमम्।
रहस्यं सूत्र सम्बन्धं निबन्धं विदुषामपि॥ १३७॥

केनोत्पन्नं कुतो वापि (लज्जकेन/लघ केन) प्रवर्तितम्।
मन्त्ररूपं सदाध्येयं क्विपदक्षरसंमितम्॥ १३८॥

निरुक्तिलक्षणं वेदा प्रमाणं वेद संमितम्।
सर्वबीजमयंसूत्रमाद्यं रामाक्षरं महत्॥ १३९॥

महामायोवाच

कदाचित्सूयतेविश्वं येनवात्रायते भयात्।
इति सूत्र पदं प्रोक्तं ब्रह्मलिङ्गनिदर्शनम्॥ १४०॥

सूत्रमूलमिदंविश्वंसूत्रेसर्वं प्रतिष्ठितम्।
सूत्रेण जायते विश्वं विना सूत्रं विलीयते॥ १४१॥

प्रणम्यादौ महादेवं देवदेवं रघूद्वहम्।
जानकीवल्लभंकान्तं द्विभुजं खरवैरिणम्॥ १४२॥

रामाङ्घ्रिध्यानसौभाग्यात् सीतापदनिषेवणात्।
किञ्चिज्जानामि देवेशं सूत्रं भक्ति प्रवर्तनम्॥ १४३॥

महाविष्णुर्सहस्राणां महाशम्भुर्शतस्य च।
सृष्टिस्थितिस्तत्वानां च कर्तासौ रघुनन्दनः॥ १४४॥

सीतानित्यापरासूक्ष्मा सैषदाशरथिः प्रभुः।
रामाच्चैकः परः सत्योनान्यं सत्यं कदाचन॥ १४५॥

शपथं करोमि ते वत्स पादयोनस्तुनप्रभोः।
रामादन्यंतसंवेद्मिपरिदेवंसदीश्वरम्॥ १४६॥

अद्वैतेथपरंव्योम्निधामनिप्रभुरीश्वरः।
सीताप्रेमरसामोदविनोदरतिविभ्रमः॥ १४७॥

कथयामासपुत्रायसदाशिवायराघवः।
मन्त्रं षडक्षरं तारं मन्त्रिणं कल्पभूरुहम्॥ १४८॥

रामचन्द्रान्महाशम्भुर्लब्ध्वान् मन्त्रमुत्तमम्।
सुप्रकाशं सदाबोधंवृजिनार्णव तारकम्॥ १४९॥

पुरुषार्थप्रदं शश्वत् हत्याकोटिविनाशनम्।
ज्ञानादीपकलारूढं सर्वविद्याफलप्रदम्॥ १५०॥

सर्वेषां मंत्र वीर्याणां श्रेष्ठो वैष्णव उच्यते।
तेषु वैष्णव मंत्रेषु राम मंत्रः फलाधिकः॥ १५१॥

गाणपत्यादि सौरेषु शिवशक्ति जपेषु च।
मंत्रराजः इति ख्यातः कोटि कोटि गुणाधिकः॥ १५२॥

राज्यं दद्यात् स्त्रियं दद्यात् पुत्रं दद्याधनादिकम्।
मस्तकं तु स्वकं दद्यात् न च दद्यात् षडक्षरम्॥ १५३॥

अश्वमेध सहस्राणि राजसूय शतानि च।
एकतः सर्वतीर्थानि दानव्रत तपांसि च॥ १५४॥

एतानि मंत्रराजस्य कला नार्हति षोडशीम्।
गुरुदेव प्रसादेन हृदि गम्यं षडक्षरम्॥ १५५॥

एष धर्म परो नित्यः एष दान परः शुचिः।
एष ज्ञान परः सूक्ष्म एष योग परोर्थदः॥ १५६॥

एष व्रत परः सिद्धिरिद्धिश्च सर्व सम्पदाम्।
एष तपः परः श्रेष्ठः एष यज्ञ परो हविः॥ १५७॥

धर्माणां धर्म निचयः पुण्यानां पुण्य सञ्चयः।
व्रतानां व्रत राजोऽसौ देवानां प्रवरो गुरुः॥ १५८॥

इति मंत्रः सविज्ञेयस्तारकं इति संज्ञितः।
कल्पवृक्षइतिस्फीतंसाधकानांफलप्रदः॥ १५९॥

महाविष्णुरुवाच

सत्तु मातस्त्वया ज्ञेयो मंत्रराजः षडक्षरम्।
विना गुरु प्रसादेन कथं सिद्धिर्भविष्यति॥ १६०॥

एवं च शिरसा तात प्रसादाय महाशिवम्।
यत्प्रसादान्मनुं लब्ध्वा मोदथाः/मोद्दथाः सहशक्तिनीः॥ १६१॥

महाशम्भुरुवाच

देवदेवजगद्धाता लोकानामभयप्रदम्।
प्रसादं कुरु देवेश देहि मंत्र षडक्षरम्॥ १६२॥

सौमित्रिरुवाच

एतत् श्रुत्वा महाशम्भुः प्रणम्यादौ रघूद्वहम्।
सर्वैश्वर्यं प्रदं मंत्रं दत्तवान् विश्व हेतवे॥ १६३॥

तस्य विज्ञान मात्रेण मन्त्रस्य जगदीश्वरः।
सर्वैश्वर्यं सदारूढो महाविष्णु स्वयं स्वराट्॥ १६४॥

इत्युक्तासौ महाशम्भुर्भगवान् प्रभुरव्ययः।
विससर्ज महाविष्णुः पुत्रमाघ्राय मस्तके॥ १६५॥

श्रुतयः ऊचुः

एषा श्रुता महाबाहो सूत्र सम्बन्धिनी कथा।
केन प्रवर्तितं लोके ? केन महात्मना॥ १६६॥

एतत् सर्वं कृपा पूर्वं कथयस्वयथातथम्।
त्वं देव जगतां नाथ कार्यकारणतत्ववित्॥ १६७॥

सौमित्रिरुवाच

लब्ध्वाहूय ततो देवान् ब्रह्मविष्णमहेश्वरान्।
कथयामासदेवेशो मूलमंत्रंषडक्षरम्॥ १६८॥

एकमासीत्तथा पूर्वं सूत्रं कमल सम्भवम्।
त्रिप्रपञ्चं यदा प्राप्तं देव त्रिविधं कृतम्॥ १६९॥

प्रकृतं ब्रह्म सूत्रं च महाशाम्भवमैश्वरम्।
गुप्तं चक्रुश्च ते देवो ज्ञात्वा ब्रह्म निदर्शनम्॥ १७०॥

गुप्तं भूतं तदा चासिदिव्यंयुगसहस्रकम्।
किमपिकालभावाच्च जीवलोकानुकम्पया॥ १७१॥

देव्यानुबोधितः श्रीमान् विष्णु सर्वजनेश्वरम्।
ग्राहयामास तां देवीं तारकं ब्रह्मवाचकम्॥ १७२॥

श्रीवैष्णवपदंप्रोक्तं राघवाक्षरचिन्तनात्।
भवबन्धिविनाशायलोकानांहितकाम्यया॥ १७३॥

इदं दिव्यमिदं रम्यमिदं भाव्यमिदं शुचिः।
गुह्यात् गुह्यतमं सौम्यं गुह्यानां गुह्यमुत्तमम्॥ १७४॥

पवित्राणां पवित्रं तत् मङ्गलानां च मङ्गलम्।
आश्रयं सर्वदेवानां योगीनां सिद्धिदायकम्॥ १७५॥

स्त्रीणामाकर्षणं दिव्यं मारणं दुष्ट चेतसाम्।
स्तम्भनं परसैन्यानां वशीकरणमायुषम्॥ १७६॥

उच्चाटनं च पापानां दीपनं जड चेतसाम्।
पठनात् श्रवणाद्यस्य मुक्तिरेव न संशयः॥ १७७॥

तस्मात्सर्व प्रयत्नेन (पवितव्यं) समाहितैः॥

इति श्रीलक्ष्मणनिरुक्तायां सदाशिवसंहितायां परमहंस रामानुज वेद संवादेनवांशके तत्वोत्पत्तिर्नाम नवमोध्यायः॥

---

*EDITED AND COMPILED BY -*
*VISHAL PANDEY (SITARAMADASA)*
*B.TECH - IIT KANPUR*